# .. hanumatstavarAjaH ..

# ॥ हनुमत्स्तवराजः ॥

श्रीगणेशाय नमः ।
हनुमानुवाच ।
तिरश्चामपि यो राजा समवायं समीयुषाम् ।
तथा सुग्रीवमुख्यानां यस्तं वन्द्यं नमाम्यहम् ॥ १॥
सकृदेव प्रसन्नाय विशिष्टायैव राज्यदः ।
विभीषणाय यो देवस्तं वीरं प्रणमाम्यहम् ॥ २॥
यो महापुरुषो व्यापी महाब्धौ कृतसेतुकः ।
स्तुतो येन जटायुश्च महाविष्णुं नमाम्यहम् ॥ ३॥
तेजसाप्यायिता यस्य ज्वलन्ति ज्वलनादयः ।
प्रकाशते स्वतन्त्रो यस्तं ज्वलन्तं नमाम्यहम् ॥ ४॥
सर्वतोमुखता येन लीलया दर्शिता रणे ।
राक्षसेश्वरयोधानां तं वन्दे सर्वतोमुखम् ॥ ५॥
नृभावं तु प्रपन्नानां हिनस्ति च सदा रुजम् ।
नृसिंहतनुमप्राप्तो यस्तं नृसिंहं नमाम्यहम् ॥ ६॥
यस्माद्बिभ्यति वातार्कज्वलनेन्द्राः समृत्यवः ।
भयं तनोति पापानां भीषणं तं नमाम्यहम् ॥ ७॥
परस्य योग्यतां वीक्ष्य हरते पापसन्ततिम् ।
पुरस्य योग्यतां वीक्ष्य तं भद्रं प्रणमाम्यहम् ॥ ८॥
यो मृत्युं निजदासानां मारयत्यतिचेष्टदः ।
तत्रापि निजदासार्थं मृत्युमृत्युं नमाम्यहम् ॥ ९॥
यत्पादपद्मप्रणतो भवत्युत्तमपुरुषः ।
तमीशं सर्वदेवानां नमनीयं नमाम्यहम् ॥ १०॥
आत्मभावं समुत्क्षिप्य दास्यं चैव रघुत्तमम् ।
भजेऽहं प्रत्यहं रामं ससीतं सहलक्ष्मणम् ॥ ११॥
नित्यं श्रीरामभक्तस्य किङ्करा यमकिङ्कराः ।
शिववत्यो दिशस्तस्य सिद्धयस्तस्य दासिकाः ॥ १२॥
इदं हनुमता प्रोक्तं मन्त्रराजात्मकं स्तवम् ।
पठेदनुदिनं यस्तु स रामे भक्तिमान्भवेत् ॥ १३॥
॥ इति हनुमत्कल्पे श्रीहनुमन्मन्त्रराजात्मकस्तवराजः सम्पूर्णम् ॥